Shri Raghunatha Temple MSS. Library,
JAMMU

No. ८६५ - घ

Title क्षयाधिकमासयोर्विवृतिः

Author व्यासगणेशकृता

Extent ८ Age

Subject धर्मशास्त्रम् . अपूर्णम्

(७)

नं० ८७५-घ

क्षयाधिकमासयोर्विवृतिः (धर्मशास्त्रम्)
पत्राणि ७ (~~अपूर्णम्~~) (अपूर्णम्)
नं० ८७५ - घ
कर्त्री व्यासगणेशकृता

नं०—८७५ मि
श्रीअधिकमासविवृतिः
७ पत्राणि
पूर्णा [illegible] अपूर्ण
कर्त्ता— [illegible]

द्वयमासपद्धतिर्व्यासजलेशकृता प० ११

॥६॥ ॐ स्वस्ति श्रीगणेशाय नमः ॥ यं देवाः कमलासनप्रभृतयो विघ्नांधकारारुणं वन्दं
ते सकलेषु कर्म्मसु सदा विघ्नावलीशान्तये ॥ तन्त्वेन्द्रादिकवृन्दवन्दितपदं वन्दे गणाधी
श्वरं सा भाचन्द्रिगणेशदत्तगणको निर्विघ्नसिद्ध्यै मुदा ॥१॥ यस्यांघ्रिध्यानवशाद्वि
घ्नतमो नाशमायाति ॥ तं वन्दे गजवक्त्रं कार्य्यसिद्धिप्रदं नृणाम् ॥२॥ दंत्यास्यं भग्नं
गतं विघ्नौघध्वंसिनं देवम् ॥ भजत बुधाः कार्य्यादौ वेकरदं कार्य्यसंसिद्ध्यै ॥३॥ श्रीम
त्कुञ्जरवक्त्रपादनलिना ज्ज्ञातः परागोदयस्तस्यैकं कणिका करोति यदलं विघ्नव्रजा
न्समस्तान् ॥ तन्मन्ये नहि चित्रमित्थमनाकिं वन्हेः स्फुलिङ्गोत्तृणात्त्वचीमुखकतृणा
दितूलनिचयान्भस्मीकरोति ध्रुवं ॥४॥ श्रीमद्धस्तिमुखं प्रणम्य शिरसा विद्यागुरून्स
द्गुरून्नादित्सप्रभृतीन्ग्रहान्सहृदयः संतानदेवीं तथा ॥ ब्राह्मीं श्रीशपदारविंदयुगलं सं

वेरमासस्याभिधोन्यूनाव्हाधिकमासयोः स्तुविष्टतिं कुर्वे यथाश्रोतुरिवि ॥ ५ ॥ अथ चिकी-
र्षितायां मलमासमीमांसायां तदुपयोगिनं तावन्मानविवेचनमाह सिद्धान्तशिरोमणौ
भास्कराचार्य्यः ॥ एवं हि षड्ज्ञानुषदैवजैवपैत्रर्क्षसौरैन्दवसावनानि ॥ ब्राह्मस्य च काले
नवमं च मानं ग्रहास्तु साध्या मनुजैः स्वमानादिति ॥ देवत्तभूषणेऽपि ॥ सौरं च सावनं कमै
न्दवमार्क्षमानं पैत्रं गुरोरथ मनोर्मतं ताम नेन ॥ मानैर्विधेरिति नवाखिलकर्मसिद्धेर्मा-
नानि मान नवकेन तु निश्चयस्स्या दिति· एवं नव मानान्युक्त्वा नितेषु चतुर्मानात्मकं मनु
ष्यमानं ॥ तदुक्तं भास्कराचार्य्यैः स्वग्रन्थे ॥ ज्ञेयं विमिश्रं तु मनुष्यमानं मानैश्चतुर्भिर्व्यव
हारसिद्धिरिति· चतुर्भिः कैरिति संशयं निराकुर्वन्नाह भास्करो गणिताध्याये स्पकालमाना
धिकारे ॥ वर्षायनर्तुयुगपूर्वकमत्र सौरान्मासांस्तथा च तिथयस्तुहिनांशुमानात् ॥ यत

रुच्युसूतकचिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्द्रमानादिति ॥ एतदेवोक्तं दै
वज्ञभूषणे पि ॥ वर्षायनर्तुयुगपूर्वकमेव देवमानादिमानमखिलं किल सौरमानात् ॥८
स्यात्सूच्युसूतकचिकित्सितवासराद्यं मुत्तपादिकेद्दि विषदां खलु सावनाच्चेति ॥ अथ
नाक्षत्रमानमुक्तं भास्करीये गणिते स्कंधे ॥ गुर्वक्षराणां नुदितं च षष्ट्या पलं पलानां घटि
का किले का ॥ षष्ट्या घटीनां भदिनं तथाद्यैरिति ॥ यो ऽह्नो निमेषो स्वखराम ३० भागः
सतत्परस्तच्छत भाग उक्ता ॥ त्रुटिर्निमेषेर्धृति भिश्च काष्ठा तत्त्रिंशता सद्गणकैः कलो
क्ता ॥१॥ त्रिंशत्कलाभिर्घटिका क्षणः स्यान्नाडीद्वयं तैः खगुणे ३० र्दिनं च ॥ गुर्वक्षरैः खेन्दु
मितैरसुस्तैः षड्भिः पलं तैर्घटिका खषड्भिः ६० स्याद्वा घटीषष्टिरहः खरामैर्मासो दिनै
स्तैर्द्विकुभिश्च वर्षं मितिच ॥ तदेवोक्तं सूर्यसिद्धांते कालनिरूपणाधिकारे मध्यमा

ध्याये॰ भूतानामंतकृत्कालः कालोऽन्यः कलनात्मकः ॥ स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चा
मूर्त्त उच्यते ॥ १० ॥ प्राणादिः कथितो मूर्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः ॥ दशगुर्वक्षराणामव्यवहिता
नामुच्चारणपरिमितः कालः प्राणः । गुर्वक्षरलक्षणमुक्तं छंदश्शास्त्रे । सानुस्वारो विसर्गांतो
दीर्घो युक्तपरश्च यः । वर्णस्तं गुरुमित्याहुः छंदःशास्त्रविशारदा इति॰ षड्भिः प्राणैर्विनाडी
स्यात्तत्षष्ट्या नाडिका स्मृता । नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितं॰ तत्त्रिंशता भवेन्मा-
सः सावनोऽर्कोदयैस्तथेति॰ अथ सावनमानं सौरमानं च प्रकल्पितं दैवज्ञाभरणे॰ खरमरीचेरुद
यद्वयजांतरं तदिह सावनसंज्ञदिनं स्फुटम् । प्रतिदिने स्फुटभुक्तिमितिः सदा खरगभस्ति
दिनं विबुधैः स्मृतमिति॰ तदेव सिद्धांतशिरोमणौ भास्कराचार्यैरुल्लिखितं । इनोदयद्व-
यांतरं तदर्कसावनं दिनं । तदेव मेदिनीदिनं भवासरस्तमममदति॰ अथ कलामानेन सा

वनदिनप्रमाणमाह भास्करः॥ समंसमस्तूर्योवुदितौ किलार्कौ षष्ट्या घटीनामुदितं पुनर्भम्॥ २
3 विस्तृतः स्वोदयभुक्तिघातात्खाभ्राष्टभू १८०० लब्धसमासुभिश्च॥ १॥ समागतासुसंयुतारवेस्तु षष्टिना
डिकाः। स्फुटद्युगत्रसुजमाद्युभुक्तितश्चतश्च लहिति। षष्ट्या घटीनां भदिनं किलार्को न द्युक्तितुल्या
सुयुतेरवर्कोः स्यात्ममध्यमं सावनमेवमह्नेत संख्यकाभवन्मतोनिरेकोनि ग्रस्यार्थः। यदा कि
मपिनक्षत्रं सूर्यश्च किल समकालमुदितस्तस्मात्कालादनंतरं नाक्षत्राणां घटीनां षष्ट्या नक्षत्रं
पुनरुदेति। ततोनंतरं रविरुदेति। सचकियताकालेन तदर्थमनुपातः। रविः किल कोत्रिष्टत्तेस्फु
टगत्या सर्वतोगतः यद्युष्णादशपणतानि राशिकलाः स्वोदयासुभिरुज्छन्ति तदा स्फुटगतिक
लाः कियद्भिरिति। एवं लब्धासुभिर्भोदयानंतरं रवेरुदयः। अतएव नाक्षत्राः षष्टिघटिकास्ते ल
ब्धासुभिरधिकाः रवेः स्फुटं सावनमहोरात्रं भवति। तच्चाहोरात्रं चलं। अत्यहमन्याहरू अत्यहंगतस २
न्यत्वात्। अतिमासं रात्र्युदयान्यतमत्वाच्च। यत्तु नर्घटीषष्ट्यामध्यमभुक्तितुल्यासुयुतयासावनेर

घुरात्रमुच्यते। तन्मध्यमं यतो ऽक्षांशे यावन्ति स्फुटसावनानि भवंति तावंत एव मध्यमानि स्युः ॥११
तीनामुदयानां वक्रासहृष्योस्तुल्यत्वात्। तत्कथं नित्यं रविगतिलिप्तासमासुभिः सहितनाडी(
त्राहः सावनाहो भवतीति पदन्येरुक्तं स्यादेतत्। यदि विषुवन्मंडलेन रविः सर्वतो याति तर्हि विषु
वन्मंडलस्यैकाकलाएकेनासुनोदेति तदा रविगतिलिप्तासमासुभिरिति वक्तुं युज्यते। तन्न युक्तं
रविः क्रान्तिवृत्तेन याति। यत्र मेषराशेः कलाष्टादशशतानि १८०० गगनभूधररसचंद्रैर्मि
तैः १६७० रसुभिरुदयंति अन्यस्यान्तैरिति कलानामनुपातेन असवः कर्तुं युज्यन्ते। एवं सं(
ते सति स्फुटमहोरात्रं भवति यत्तैरुक्तं तन्मध्यममेव। एवं वर्षमध्ये यावंति स्फुटसावनानि तावं
त्येव मध्यमानि स्युः। एतत्संख्यकाभभ्रमतो निरेकेति। यावंतो भभ्रमा याता तास्तत्संख्यैकोना सती
सावनदिनसंख्या भवति। यतो रविः सर्वतो गच्छन्नेकं परिवर्तं गतः। अतस्तस्योदयसंख्यैकोनेत्युपप

अथ वर्षमासमानमुक्तं देवदत्ताभूपाले· खमितमिता मासाः खखवह्निमितैः ३०दिनैर्भवति मासि दिनैः खखमास्त्वेति·१

घते· अथ सौरवर्षमाह· रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेवेति· अथैकस्मि-
न्सौरवर्षे सावनदिनसंख्यां सूर्यमासं चाह सिद्धान्तशिरोमणौ मध्यमगतिवासनायां गोलाध्या
ये भास्कराचार्यः ।। पंचांगरामास्तिथयः खरामाः सार्द्धद्विदस्राः कुदिनाद्यमब्दे ।३६५।१५।३०।
२२।३० अस्यार्कमासोऽर्कलवः प्रदिष्टस्त्रिंशद्दिनैः सावनसंज्ञ एवेति· दैवज्ञभूषणे विभदिनसा
वनदिनमानमुक्तं· भवासरास्त्वरसांगरामाः ३६६ सार्द्धद्विदस्रान्वितखाग्नितुल्यैः ।पलैर्यु
तामितिस्थि नाडिकाभिः १५।३०।२२।३० युक्ता विधूना ३६५।१५।३०।२२।३० रविसावनाः स्युरिति·
अथ सौरवर्षे सौरदिनान्युक्तान्युक्तानि देवदत्ताभरणे· सौराब्दमध्ये गगनेन्दुमिता ३६० हि वासराः स्मृता
बुधैः सर्वस्तु कर्मसु श्रवणमिति· इदानीं सावनमानेन चान्द्रमासदिनसंख्यामाह सिद्धान्तशिरोमणौ ४
भास्करः ।कालेन येनेति पुनः शशीनं क्रामन्भचक्रे विवरेण गत्योः ।मासः स चान्द्रोऽङ्कयमाः कुराणां

प्रतिदिनं स्फुटभुक्तिमितिः सदा खरामसत्तिदिनं विबुधैः स्मृतम्

माः पूर्णेषवत्सत्कुद्दिनप्रमाणं २९।३१।५० अथैकस्मिन्सौरवर्षे चांद्रदिनसंख्यामाह देवस्तम्भूषणका
रः।। वर्षैकमध्ये शशिनो दिनानि हिमांशुसप्ताग्निमितानि रस्ताः ३७१ सार्द्धद्विबाणं तु पलैर्युते
न घटीत्रयेणैव युतान्यथाऽऽहुरिति। एवमेवोक्तं भास्कराचार्यैः। रवीन्दोर्युतेः संयुतिर्यो वदन्यावि
धो मासः एतच्च पैत्रं द्युरात्र मिति खिलं विस्तरेण प्रकृतमनुसरामः।। इदानीं मलमासस्य हेतुभूतमेदं
वमासप्रमाणं सविस्तरतया वदिष्यामः।। तदुक्तं निर्णयसिन्धौ। पक्षयुगजश्चान्द्रोमासः। स
द्वेधा। शुक्लादिदर्शान्तः कृष्णादिः पूर्णिमान्तश्च। तथा च त्रिकाण्डमण्डनः। चान्द्रोपि शुक्लप
क्षादिः कृष्णादिर्वेति च द्विधेस्तु क्वादेशभेदेन तद्व्यवस्थामाह। कृष्णपक्षादिके मासे नाङ्गी
कुर्वन्ति केचन। ये पीच्छन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिणे इति विंध्यदक्षिणे कृष्णादि
निषेधादुत्तरतो द्वयोरप्यनुज्ञा गम्यते। तत्रापि शुक्लादिर्मुख्यः। कृष्णादिर्गौणः। शास्त्रेषु चै

त्र शुक्लप्रतिपद्येव चान्द्रसंवत्सरारंभो क्तः। तदुक्तं दीपिकायां। चान्द्रोऽब्दो मधुशुक्लगप्रतिपदारंभ
5 इति। ये कृष्णादिमन्यन्ते तेषां संवत्सरारम्भो भिद्यते। अतः शुक्लादिर्मुख्यः कृष्णादिर्गौणः। कृ
ष्णादिना मलमासासंभवाच्च। चन्द्रस्य सर्वनक्षत्रभोगेन नाक्षत्रो मासः। सावनादीनां व्य
वस्थोक्ता हेमाद्रौ ब्रह्मसिद्धान्ते। अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु। संक्रा
न्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोरिति। अत्र ब्राह्मणादीनां वचनान्तरेण यत्र कर्म
विशेषे वसंते ब्राह्मणोऽग्नीनादधीतेत्यादिवन्मास उक्तस्तत्र दर्शान्तत्वमात्रं नियम्यते। न
तु सर्वकर्मसु दर्शान्त एवेति। दृष्टार्थ्यघर्थसौभरेहीत्यादिनिधननियमवद्विधिलाघवा
त्। त्रैवर्णिकानां सर्वकर्मसु मासविशेषविधेः सावनादीनां श्रुत्यनुलोमादिपरत्वापत्ते ५
श्चेति गुरुचरणाः। ज्योतिर्गार्ग्यः। सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके

पितृकार्ये च चान्द्रो मासः प्रशस्यते॥ ऋष्यशृंगः॥ विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते॥ पार्
वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके॥ स्मृत्यन्तरे॥ एकोद्दिष्टविवाहादावयणादौ सौरसावनौ॥
ज्योतिर्गर्गः॥ आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा॥ सावनेनैव कर्त्तव्या शत्रूणां चा
प्युपासना॥ विष्णुधर्मे॥ नक्षत्रसत्राण्ययनानि चेन्द्रो मासेन कुर्याद्गगणात्मकेनेति॥ श्राद्धे
तिथिकृत्ये च कृष्णादिं व्रतेषु शुक्लादिमेव च॥ विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत्॥
शुक्लेसा यत्तु शुक्लादिरमान्तः कृष्णादिः पूर्णिमान्तश्च एषां संवत्सरस्य प्रथमा रात्रिर्या फाल्गुनी पौर्णमा
दन्ततः सीत्यादौ अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने॥ मासि भाद्रपदेऽष्टम्यामित्यादिदर्शितवाक्ये
ष्वपि चैत्रादिशब्दानां पूर्णिमान्तमासे प्रवृत्तिर्दृश्यते॥ तथापि चान्द्रमासेत्यादिसामान्यशा
स्त्राणां चैत्रवैशाखेत्यादिविशेषशास्त्राणां च प्रवृत्तिर्दर्शान्तमास एव॥ पक्षौ पूर्वापरौ शुक्लकृष्णौ

6 मासस्तत्तावुभावित्यादिकोशात्. दर्शावधिं चान्द्रमुशन्ति मासमित्यादिना च चान्द्रः शुक्लादि
दर्शान्तः रवीन्द्वोर्युतेः संयुतिर्यावदन्या विधोर्मास इत्यादिलक्षणवाक्येभ्यः किंचात्र लग-
धाचार्य्योक्त चैत्रादिलक्षणस्य दर्शान्तमासस्यैव संगतत्वाच्च. मेषगरविसंक्रान्तिः श-
त्रिमासे भवति स हि चैत्रः । एवं वैशाखाद्या वृषादिसंक्रान्तियोगेनेति. दर्शान्तचैत्रादौ मे-
षादिसंक्रान्तिरावश्यकी. मलमासे तु सति मलमासस्य पूर्वार्द्धकं प[illegible]दिनात्मकमेकं मा-
संगृहीत्वा लक्षणे संगतं द्विसंक्रान्तियुक्ते क्षयमासे तु संगतं. संज्ञाद्वयमुपपन्नं. इदानीं दर्शा-
न्तलक्षणमुच्यते. दर्शस्यान्तो दर्शान्तः दर्शत्वं च. दर्शः सूर्येन्दुसंगम इत्यभिधानात् सूर्येन्दुसमा-
बोध्यं गमत्वं अन्तत्वं. अन्तो नाशो द्वयोर्मध्ये तु इतिकोशबलाद् तच्छब्दो नाशपरः. नाशत्वं च. णश अ- ६
दर्शने इत्यस्माद्धातोरधिकरणघञा नाशशब्दो व्युत्पादितः इत्यनेन सूर्येन्दुसमागमादर्शनं

यदा भवति तदा दर्शान्तः॥ सूर्येन्द्वोर्बिंबैक्यं तिष्ठंते तदनंतरं पंचघटीभिरेनु भानोर्मंडलमु
ल्लंघ्य सर्वतो याति तदा मासस्समाप्तिः॥ रित्यलं पल्लवितेन॥ अथाधिमासक्षयमासयोर्ल
क्षणमुक्तं सिद्धांतशिरोमणौ॥ असंक्रांतिमासोधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्ष
याख्यः कदाचित्॥ क्षयः कार्त्तिकादित्रयेनान्यतः स्यात्तदा वर्षमध्येधिमासद्वयं चेति॥१
उक्तं च रामदैवज्ञैः॥ स्पष्टार्कसंक्रांतिविहीन उक्तो मासोधिमासः क्षयमासकस्तु॥ द्विसंक्र
मस्त्वविभागयोः स्तस्तिथ्येहि मासौ प्रथमांत्यसंज्ञौ इति॥ यस्मिन्दर्शे स्यात्तादर्शमेवापरं यदाह वसिष्ठः॥
दर्शे॥ उक्तं ध्यम भवति भानोः संक्रांतिस्सोधिमासः स्यात्॥ अथ तद्दर्शयोर्मध्ये भानोरेव तत
योर्यदा॥ संक्रांतिद्वितयं स्यात्स न्यूनमासः स उच्यते इति॥ यदाह करणपः॥ यस्मिन्मासेऽर्क

संक्रांतिर्दर्शांतात्प्राक्परंपरम्· दर्शमुल्लंघ्य भवति संसर्पोऽधिकमासकः· आरभ्य शुक्ल
7 प्रतिपत्स्ववेलायां संक्रमद्वयम्· द्वितीयदर्शनात्प्राक्तु आकुर्न्यूनाख्यस्तत्र सर्प्येतिरिति· क
ल्पलतायामपि· दर्शांतयोर्द्वयोर्मध्येऽधिमासश्चेन्न संक्रमः। द्विसंक्रांतीदयः स्यात्स
एकोपि क्षामकोऽभवेदिति· तदुक्तं मदनरत्नोदाहृतवाक्ये· यत्र मासि रविसंक्रमद्वयं
तत्र मासयुगलं त्तया क्षयमिति·